# तिरुक्कुरल्-सूक्ति -सौरभम्

**संस्कृते परिचयः (Introduction)**

(चेन्नईनगरस्य समुद्रतटः। तत्र तिरुवल्लुवरस्य प्रतिमां दृष्ट्वा छात्राः परस्परं चर्चां कुर्वन्ति।)

**शारदा** नमिते! पश्य पश्य एतां प्रतिमाम्। मन्ये कोऽपि महाकविः।
**नमिता** कथं मन्यते?
**संगीता** किं न पश्यसि यत् अस्य हस्ते तु पुस्तकम् इव किञ्चित् विराजते।
**श्यामा** आम् आम्! किञ्चिद् लिखति सः!
**प्रणवः** ननु अत्रैव लिखितम्। एष खलु महाकविः तिरुवल्लुवरः इति।
**साक्षी** अहो एष एव महाकविः येन तिरुक्कुरल् इति महान् पावनः ग्रन्थः विरचितः।
**सुप्रज्ञः** आम्। मम जनकस्तु प्रतिदिनमेव अस्य पाठं करोति। तेन तु अधिकांशपद्यानि कण्ठस्थीकृतानि।
**सौम्यः** अहो स्मरामि। अस्माकं संस्कृतपुस्तके तु अस्य एव ग्रन्थस्य कतिचित् पद्यानि संस्कृतभाषायाम् अनूद्य प्रदत्तानि।
**सर्वे** तर्हि अवश्यमेव पठिष्यामः तं पाठं, ज्ञानवृद्धिं च करिष्यामः।

**हिंदी अनुवाद (Hindi Translation)**

(चेन्नई नगर का समुद्र का किनारा। वहाँ तिरुवल्लुवर की प्रतिमा को देखकर विद्यार्थी आपस में चर्चा करते हैं।)

**शारदा** हे नमिता! देखो, देखो इस प्रतिमा को (देखो)। मुझे लगता है यह कोई महाकवि हैं।
**नमिता** कैसे जानती हो?
**संगीता** क्या तुम नहीं देख रही हो कि इनके हाथ में कुछ पुस्तक-सी दिख रही है।
**श्यामा** हाँ, हाँ वह कुछ लिख रहे हैं।
**प्रणव** यहीं पर लिखा है कि ये महाकवि तिरुवल्लुवर हैं।
**साक्षी** अरे! यही वे महाकवि हैं जिन्होंने तिरुक्कुरल् नामक इस महान पवित्र ग्रंथ को लिखा है।
**सुप्रज्ञ** हाँ, मेरे पिताजी तो हर रोज इसका पाठ करते हैं। उन्होंने तो इसके अधिकांश श्लोक याद कर लिए हैं।
**सौम्य** अहो! मुझे याद आ गया। हमारी संस्कृत की पुस्तक में इसी ग्रंथ के कुछ श्लोक संस्कृत भाषा में अनुवाद करके दिए गए हैं।
**सर्वे** तो अवश्य ही हम सब उस पाठ को पढ़ेंगे और ज्ञान में वृद्धि करेंगे।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**प्रतिमां**–मूर्तिम्, मूर्ति को (To statue)। **अनूद्य**–अनुवादम् कृत्वा, अनुवाद करके (By translating)। **ग्रन्थः**–पुस्तकं, पुस्तक (Book)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

कोऽपि – कः + अपि (विसर्ग सन्धिः)।
किञ्चित् – किम् + चित् (परसवर्ण सन्धिः)।
अत्रैव – अत्र + एव (वृद्धि सन्धिः)।
जनकस्तु – जनकः + तु (विसर्ग सन्धिः)।

**समासाः (Compounds)**

समुद्रतटः – समुद्रस्य तटः (षष्ठी तत्पुरुषः)।
महाकविः – महान् कविः (कर्मधारयः)।
ज्ञानवृद्धिम् – ज्ञाने वृद्धिम् (सप्तमी तत्पुरुषः)।
महान् पावनः ग्रन्थः – महापावनग्रन्थः (कर्मधारयः)।
प्रतिदिनम् – दिनम् दिनम् इति (अव्ययीभावः)।
अधिकांश पद्यानि – अधिकांशानि पद्यानि (कर्मधारयः)।
संस्कृत पुस्तके – संस्कृतस्य पुस्तके (षष्ठी तत्पुरुषः)।

**प्रत्ययाः (Suffixes)**

लिखितम् – लिख् + क्त।
अनूद्य – अनु + वद् + ल्यप्।
विरचितः – वि + रच् + क्त।
दृष्ट्वा – दृश् + क्त्वा।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**
(*i*) प्रतिमा कस्य वर्तते?
(*ii*) का प्रतिमाम् 'महाकविः' इति मन्यते?

**(II) पूर्णवाक्येन उत्तरत–**
संस्कृतपुस्तके किम् प्रदत्तम्?

**(III) भाषिककार्यम्–**
(*i*) 'प्रदत्तानि' क्रियापदस्य कर्तृपदं किम्?
(क) श्लोकानि (ख) पद्यानि (ग) छन्दांसि (घ) कतिचित्
(*ii*) 'पाठम्' अस्य विशेषणपदं किम्?
(क) तम् (ख) सः (ग) तत् (घ) एतम्
(*iii*) 'मूर्तिम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(क) प्रतिमा (ख) एतां (ग) यात्राणि (घ) प्रतिमान्
(*iv*) 'अत्रैव' इति पदस्य सन्धिविच्छेदं कृत्वा लिखत।
(क) अत्र + इव (ख) अत्र + ऐव (ग) अत्र + एव (घ) अत्र + ऐव

**उत्तराणि–** (I) (*i*) तिरुवल्लुवरस्य (*ii*) शारदा।
(II) संस्कृतपुस्तके 'तिरुक्कुरल्' इति ग्रन्थस्य कतिचित् पद्यानि संस्कृत भाषायाम् अनूद्य प्रदत्तानि।
(III) (*i*) (ख) पद्यानि (*ii*) (क) तम् (*iii*) (घ) प्रतिमाम् (*iv*) (ग) अत्र + एव।

**प्रश्ननिर्माणम्–** (*i*) एषः खलु महाकविः **तिरुवल्लुवरः** अस्ति।
(*ii*) पद्यानि पठित्वा वयं **ज्ञानवृद्धिं** करिष्यामः।
(*iii*) छात्राः **सन्त-तिरुवल्लुवरस्य** प्रतिमां दृष्ट्वा परस्परं चर्चां कुर्वन्ति।
(*iv*) अनेन **महान् पावनः** ग्रन्थः विरचितः।
(*v*) तस्य नाम **तिरुक्कुरल्** वर्तते।

**उत्तराणि–**(*i*) कः (*ii*) किम् (*iii*) कस्य (*iv*) कीदृशः (*v*) किम्।

## तिरक्कुरल्-सूक्ति-सौरभम्
**(तिरुक्कुरल् की सूक्तियों की सुगंध)**

1. *पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।*
*पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥ 1 ॥*

### हिंदी अनुवाद (Hindi Translation)

पिता पुत्र को बचपन में विद्यारूपी बहुत बड़ा धन देता है। इससे पिता ने क्या तप किया? यह कथन ही उसकी कृतज्ञता है।

### अन्वयः (Prose-order)

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।**

पिता (*i*) ………………… बाल्ये महत् (*ii*) ………………… यच्छति। अस्य (पुत्रस्य) पिता किं (*iii*) ………………… तेपे इति (*iv*) ………………… तत्कृतज्ञता।

**मञ्जूषा–** विद्याधनं, उक्तिः, पुत्राय, तपः

**उत्तराणि–**(*i*) पुत्राय (*ii*) विद्याधनं (*iii*) तपः (*iv*) उक्तिः

### शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**बाल्ये**–बाल्ये वयसि, बचपन में (In the childhood)। **महत्**–बृहत्, बड़ा (big)। **उक्तिः**–कथनम्, कथन (Saying)।

### संस्कृते भावार्थः (Summary)

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥ 1 ॥**

अर्थात्–बाल्ये काले स्वपुत्राय (*i*) ………………… दातुं पिता अतिकष्टं सहमानः सर्वविधं तपः कृत्वा अपि सः (*ii*) ………………… शिक्षयितुं यतते। यदि तस्य पुत्रः एतन्मात्रम् एव स्मरेत् यत् (*iii*) ………………… तस्मै (विद्यादानाय) महत् तपः अकरोत्, इयम् (*iv*) ………………… एव तस्य पुत्रस्य कृतज्ञतां प्रकटयति।

**मञ्जूषा–** उक्तिः, स्वसन्ततिं, पिता, विद्याधनं।

**उत्तराणि–**(*i*) विद्याधनं (*ii*) स्वसन्ततिं (*iii*) पिता (*iv*) उक्तिः।

### सन्धि-विच्छेदः (Disjoin Sandhi)

तपस्तेपे – तपः + तेपे (विसर्ग सन्धिः)। इत्युक्तिः – इति + उक्तिः (यण् सन्धिः)।
पिताऽस्य – पिता + अस्य (दीर्घ सन्धिः)।


### सन्धि-विच्छेदः (Disjoin Sandhi)

तपस्तेपे – तपः + तेपे (विसर्ग सन्धिः)। इत्युक्तिः – इति + उक्तिः (यण् सन्धिः)।
पिताऽस्य – पिता + अस्य (दीर्घ सन्धिः)।


### समासाः (Compounds)

विद्याधनम् – विद्या एव धनम् (कर्मधारयः)। तत्कृतज्ञता – तस्य कृतज्ञता (षष्ठी तत्पुरुषः)।

### प्रत्ययाः (Suffixes)

उक्तिः – वच् + क्तिन्। कृतज्ञता – कृतज्ञ + तल्।

### प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) विद्याधनम् कः यच्छति? (*ii*) पिता पुत्राय विद्याधनम् कदा यच्छति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) पिता कस्मै विद्याधनम् यच्छति? (*ii*) अत्र धनम् किम् अमन्यत?

**(III) भाषिककार्यम्–**

(*i*) 'विद्याधनम्' श्लोके अस्य विशेषणपदं किम्?
(क) महत् (ख) बाल्ये (ग) किम् (घ) पिता

(*ii*) श्लोके अव्ययपदं किम्?
(क) किम् (ख) तपः (ग) इति (घ) तेपे

(*iii*) 'तेपे' इति क्रियाया: कर्तृपदं किम्?
(क) पुत्र: (ख) गुरु: (ग) तप: (घ) पिता
(*iv*) 'कथनम्' इति अर्थे किं पदं प्रयुक्तम्?
(क) उक्ति: (ख) अस्य (ग) तपस्तेपे (घ) तप:

**उत्तराणि–** (I) (*i*) पिता (*ii*) बाल्ये।
(II) (*i*) पिता पुत्राय विद्याधनम् यच्छति। (*ii*) अत्र विद्याम् एव धनम् अमन्यत।
(III) (*i*) (क) महत् (*ii*) (ग) इति (*iii*) (घ) पिता (*iv*) (क) उक्ति:।

**प्रश्ननिर्माणम्–** (*i*) पिता **पुत्राय** महत् विद्याधनं यच्छति। (*ii*) एतदर्थं **पिता** महत् तप: तपति। (*iii*) इति उक्ति: एव **कृतज्ञता** भवति। (*iv*) विद्या **महत्** धनं वर्तते।

**उत्तराणि–**(*i*) कस्मै (*ii*) क: (*iii*) का (*iv*) कीदृशम्।

***2. अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।***
***तदेवाहु: महात्मान: समत्वमिति तथ्यत:॥2॥***

**हिंदी अनुवाद (Hindi Translation)**

मन में जैसी सरलता हो, वैसी ही यदि वाणी में हो, तो उसे ही महात्मा लोग वास्तव में समत्व कहते हैं।

**अन्वय: (Prose-order)**

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:॥2॥**

यथा (*i*) ........................ चित्ते तथा यदि (*ii*) ........................ भवेत्, महात्मान: (*iii*) ........................ तदेव (*iv*) ........................ इति आहु:।

**मञ्जूषा–** | वाचि, समत्त्वम्, अवक्रता, तथ्यत: |

**उत्तराणि–**(*i*) अवक्रता (*ii*) वाचि (*iii*) तथ्यत: (*iv*) समत्त्वम्

**शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**चित्ते**–मनसि, मन में (In the heart)। **समत्वम्**–समानता, समानता (Equality)। **वाचि**–वाण्याम्, वाणी में (In the voice)। **तथ्यत:**–यथार्थरूपेण, वास्तव में (In reality)।

**संस्कृते भावार्थ: (Summary)**

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:॥2॥**

अर्थात्–जनानां मनसि यथा (*i*) ........................ अस्ति तथैव यदि (*ii*) ........................ अपि भवेत्, तामेव (*iii*) ........................ ज्ञानिन: च वस्तुत: (*iv*) ........................ कथयन्ति।

**मञ्जूषा–** | समत्त्वम् (समानता), वाण्याम्, मनस्विन:, सरलता |

**उत्तराणि–**(*i*) सरलता (*ii*) वाण्याम् (*iii*) मनस्विन: (*iv*) समत्त्वम् (समानता)।

**सन्धि-विच्छेद: (Disjoin Sandhi)**

तदेवाहु: – तत् + एव (व्यञ्जन सन्धि:) + आहु: (दीर्घ सन्धि:)।
समस्वमिति – समत्त्वम् + इति (संयोग:)

**समास: (Compound)**

अवक्रता – न वक्रता (नञ् तत्पुरुष:)।

**प्रत्यया: (Suffixes)**

अवक्रता – अवक्र + तल्। समत्वम् – सम + त्व।
तथ्यत: – तथ्य + तसिल्।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**
(*i*) चित्ते किम् भवेत्? (*ii*) अवक्रता तथा कस्यां यदि भवेत्?

**(II) पूर्णवाक्येन उत्तरत–**
समत्वम् किम् कथ्यते?

**(III) भाषिककार्यम्–**
(*i*) 'भवेत्' इति क्रियापदस्य कर्तृपदम् किम्?
(क) चित्ते (ख) वाचि (ग) अवक्रता (घ) महात्मान:
(*ii*) 'वाचि' इति पदे का विभक्ति:?
(क) प्रथमा (ख) सप्तमी (ग) षष्ठी (घ) तृतीया
(*iii*) 'यथा' इति पदस्य विलोमपदम् किम्?
(क) तथा (ख) यदि (ग) तथ्यत: (घ) तदेव
(*iv*) 'महात्मन:' इति पदे क: मूलशब्द:?
(क) महात्मा (ख) महात्मन: (ग) महात्मा (घ) महात्मन्

**उत्तराणि–** (I) (*i*) अवक्रता (*ii*) वाचि।
(II) चित्ते वाचि च अवक्रता समत्वम् कथ्यते।
(III) (*i*) (ग) अवक्रता (*ii*) (ख) सप्तमी (*iii*) (क) तथा (*iv*) (घ) महात्मन्।

**प्रश्ननिर्माणम्–** (*i*) **अवक्रता** चित्ते भवेत्। (*ii*) चित्ते वाचि अवक्रता **समत्त्वं** भवति। (*iii*) **महात्मान:** तदेव समत्त्वं कथयन्ति। (*iv*) अवक्रता **वाचि** अपि भवेत्।

**उत्तराणि–**(*i*) का (*ii*) किम् (*iii*) के (*iv*) कस्याम्।

3. *त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।*
*परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥3॥*

**हिंदी अनुवाद (Hindi Translation)**

जो धर्मप्रद वाणी को छोड़कर कठोर वाणी बोले, वह मूर्ख (मानो) पके हुए फल को छोड़कर कच्चा फल खाता है।

**अन्वयः (Prose-order)**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥3॥**

यः धर्मप्रदां (*i*) .................... त्यक्त्वा (*ii*) .................... (वाचं) अभ्युदीरयेत्। (सः) (*iii*) .................... पक्वं फलं परित्यज्य (*iv*) .................... (फलं) भुङ्क्ते।

**मञ्जूषा–** परुषां, अपक्वं, विमूढधीः, वाचं

**उत्तराणि–**(*i*) वाचं (*ii*) परुषां (*iii*) विमूढधीः (*iv*) अपक्वं

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**परुषां–**कठोराम्, कठोर को (Harsh speech)। **भुङ्क्ते–**खादति, खाता है (Eats)। **अभ्युदीरयेत्–**वदति, बोलता है (Speaks)। **धर्मप्रदाम्–**धर्मयुक्ताम्, धर्मनिष्ठ सत्य व मधुर वाणी को (Righteous speech)।

**संस्कृते भावार्थः (Summary)**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥3॥**

अस्य भावोऽस्ति यत्–यः नरः सत्याम् धर्मयुक्ताम् (*i*) .................. त्यक्त्वा (*ii*) .................. वाचम् वदेत् सः (*iii*) .................. पक्वं फलं त्यक्त्वा (*iv*) .................. फलम् खादति अर्थात् तस्य नरस्य वाण्याम् सरसता मधुरता च न भवति।

**मञ्जूषा–** कठोरां, वाणीं, अपक्वं, मूर्खबुद्धिः

**उत्तराणि–**(*i*) वाणीं (*ii*) कठोरां (*iii*) मूर्खबुद्धिः (*iv*) अपक्वं

**सन्धि-विच्छेदः (Disjoin Sandhi)**

योऽभ्युदीरयेत् – यः + अभि (विसर्ग सन्धिः) + उदीरयेत् (यण् सन्धिः)।
भुङ्क्तेऽपक्वं – भुम् + क्ते (परसवर्ण सन्धिः) + अपक्वं (पूर्वरूप सन्धिः)।

**समासाः (Compounds)**

धर्मप्रदां – धर्मं प्रददाति इति (उपपद तत्पुरुषः)। विमूढधीः – विमूढा धीः यस्य सः (बहुव्रीहिः)।
अपक्वं – न पक्वं (नञ् तत्पुरुषः)।

**प्रत्ययाः (Suffixes)**

त्यक्त्वा – त्यज् + क्त्वा। परित्यज्य – परि + त्यज् + ल्यप्। पक्वम् – पच् + क्त।

**प्रश्नाः (Questions)**

**I. एकपदेन उत्तरत–**

(*i*) विमूढधीः कीदृशीं वाचं त्यजति? (*ii*) कः परुषां वाचं वदति?

**II. पूर्णवाक्येन उत्तरत–**

कः अपक्वम् फलं खादति?

**III. भाषिककार्यम्–**

(*i*) 'कठोराम्' अस्य पर्यायः श्लोकात् एव चित्वा लिखत।
(क) परुषाम् (ख) पक्वम् (ग) अपक्वम् (घ) वाचम्
(*ii*) 'पक्वम्' इति पदस्य विलोमपदं किम्?
(क) वाचं (ख) धर्मप्रदाम् (ग) अपक्वं (घ) परुषां
(*iii*) 'परुषाम्' इति कस्य पदस्य विशेषणम्?
(क) कर्मणः (ख) वाचः (ग) पुरुषस्य (घ) जनस्य
(*iv*) पक्वम् पदे कः प्रत्ययः?
(क) क्त्वा (ख) क्तवतु (ग) ल्यप् (घ) क्त

**उत्तराणि–** (I) (*i*) धर्मप्रदाम् (*ii*) विमूढधीः।
(II) विमूढधीः अपक्वम् फलम् खादति।
(III) (*i*) (क) परुषाम् (*ii*) (ग) अपक्वं (*iii*) (ख) वाचः (*iv*) (घ) क्त।

**प्रश्ननिर्माणम्–** (*i*) **विमूढधीः** अपक्वं फल भुङ्क्ते।
(*ii*) मूर्खबुद्धिः **धर्मप्रदाम्** वाचं त्यजति।
(*iii*) मूर्खः परुषां **वाचं** वदति।
(*iv*) मूढः **पक्वं फलं** परित्यजति।

**उत्तराणि–**(*i*) कः (*ii*) कीदृशीम् (*iii*) काम् (*iv*) किम्।

**4. *विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।***
***अन्येषां वदने ये तु ते चक्षुनामनी मते॥4॥***

### हिंदी अनुवाद (Hindi Translation)

इस संसार में विद्वान लोग ही आँखों वाले कहे गए हैं। दूसरों के (मूर्खों के) मुख पर जो आँखें हैं, वे तो केवल नाम की ही हैं।

### अन्वयः (Prose-order)

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुनामनी मते॥4॥**

अस्मिन् लोके (*i*) ..................... एव (*ii*) ..................... प्रकीर्तिताः। अन्येषां (*iii*) ..................... ये (चक्षुषी) ते तु (*iv*) ..................... मते।

**मञ्जूषा–** | वदने, चक्षुनामनी, विद्वांसः, चक्षुष्मन्तः |

**उत्तराणि–**(*i*) विद्वांसः (*ii*) चक्षुष्मन्तः (*iii*) वदने (*iv*) चक्षुनामनी।

### शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**चक्षुष्मन्तः**–नेत्रवन्तः, आँखों वाले (With eyes)। **प्रकीर्तिताः**–कथिताः, कहे गए हैं (Has been spoken)। **वदने**–मुखे, चेहरे पर (On the face)। **मते**–विचारे, विचार में (In the opinion)।

### संस्कृते भावार्थः (Summary)

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुनामनी मते॥4॥**

अर्थात्–विद्या एव नरस्य (*i*) ..................... अस्ति जनाः अनया एव संसारे सर्वविधं व्यवहारं कर्तुं समर्थाः भवन्ति। अतः अस्मिन् संसारे केवलं (*ii*) ..................... ज्ञानिनः विचारशीलाः एव (*iii*) ..................... कथिताः। अन्येषां विद्यारहितानाम् (*iv*) ..................... तु ये चक्षुषी भवतः ते तु नाममात्रम् एव। अतः अस्माभिः सर्वथा विद्या प्राप्त्यर्थम् एव प्रयतनीयम्।

**मञ्जूषा–** | आनने, विद्वांसः, नेत्रम्, नेत्रवन्तः |

**उत्तराणि–**(*i*) नेत्रम् (*ii*) विद्वांसः (*iii*) नेत्रवन्तः (*iv*) आनने।

### सन्धि-विच्छेदः (Disjoin Sandhi)

विद्वांस एव – विद्वांसः + एव (विसर्ग सन्धिः)। लोकेऽस्मिन् – लोके + अस्मिन् (पूर्वरूपसन्धिः)।

### प्रत्ययाः (Suffixess)

चक्षुष्मन्तः – चक्षुष् + मतुप्।
प्रकीर्तिताः – प्र + कीर् + क्त।

### प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) अत्र के चक्षुष्मन्तः?
(*ii*) विद्वांसः कुत्र चक्षुष्मन्तः प्रकीर्तिताः?

**(II) पूर्णवाक्येन उत्तरत–**

चक्षुनामनी के?

**(III) भाषिककार्यम्–**

(*i*) 'लोके अस्मिन्' इत्यनयोः पदयोः विशेषणपदं किम्?
(क) लोके (ख) अस्मिन् (ग) लोकः (घ) इदम्

(*ii*) 'प्रकीर्तिता:' इति पदे क: प्रत्यय:?

(क) क्त (ख) क्तवतु (ग) ल्यप् (घ) क्त्वा

(*iii*) 'अन्येषाम्' इति पदे का विभक्ति:?

(क) तृतीया (ख) चतुर्थी (ग) पंचमी (घ) षष्ठी

(*iv*) 'विद्वांस:' इति कर्तृपदस्य क्रियापदं किम्?

(क) मते (ख) अस्मिन् (ग) प्रकीर्तिता: (घ) अन्येषाम्

**उत्तराणि–** (I) (*i*) विद्वांस: (*ii*) लोके।

(II) मूर्खाणाम् वदने ये नेत्रे ते चक्षुनामनी।

(III) (*i*) (ख) अस्मिन् (*ii*) (क) क्त (*iii*) (घ) षष्ठी (*iv*) (ग) प्रकीर्तिता:।

**प्रश्ननिर्माणम्–** (*i*) **विद्या** एव नेत्रम् वर्तते। (*ii*) **विद्वांस:** एव चक्षुष्मन्त: प्रकीर्तिता:। (*iii*) अन्येषां वदने नाममात्रमेव **नेत्रे** स्त:। (*iv*) **विद्याहीना:** नेत्रहीना: इव भवन्ति।

**उत्तराणि–**(*i*) का (*ii*) के (*iii*) के (*iv*) के।

***5. यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय:।***
***कर्तुं शक्यो भवेद्येन स विवेक इतीरित:॥5॥***

## हिंदी अनुवाद (Hindi Translation)

जिस किसी के द्वारा भी जो कहा गया है, उसके वास्तविक अर्थ का निर्णय जिसके द्वारा किया जा सकता है, उसे विवेक कहा गया है।

## अन्वय: (Prose-order)

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय:।**
**कर्तुं शक्यो भवेद्येन स विवेक इतीरित:॥5॥**

येन (*i*) .................... अपि यत् (*ii*) .................... तस्य (*iii*) .................... येन कर्तुं शक्य: भवेत्, स: (*iv*) .................... इति ईरित:।

**मञ्जूषा–** प्रोक्तं, विवेक:, केन, तत्त्वार्थनिर्णय:

**उत्तराणि–**(*i*) केन (*ii*) प्रोक्तं (*iii*) तत्त्वार्थनिर्णय: (*iv*) विवेक:।

## शब्दार्था: (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**प्रोक्तम्**–कथितम्, कहा गया है (Has been spoken)। **ईरित:**–कथित:, कहा गया है (Has been spoken)।

## संस्कृते भावार्थ: (Summary)

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय:।**
**कर्तुं शक्यो भवेद्येन स विवेक इतीरित:॥5॥**

अस्य भावोऽस्ति यत्–येन केनापि (*i*) .................... यत् पूर्वं (*ii*) .................... अस्ति, तस्य (*iii*) .................... येन कर्तुम् शक्यते, स: (*iv*) .................... कथ्यते।

**मञ्जूषा–** यथार्थनिर्णय:, नरेण, विवेक:, कथितम्

**उत्तराणि–**(*i*) नरेण (*ii*) कथितम् (*iii*) यथार्थनिर्णय: (*iv*) विवेक:।

## समास: (Compound)

तत्त्वार्थनिर्णय: – तत्त्वार्थस्य निर्णय: (षष्ठी तत्पुरुष:)।

## सन्धि-विच्छेद: (Disjoin Sandhi)

प्रोक्तम् – प्र + उक्तम् (गुणसन्धि:)।

केनापि – केन + अपि (दीर्घसन्धिः)।
इतीरितः – इति + ईरितः (दीर्घसन्धिः)।

**प्रत्ययाः (Suffixes)**

कर्तुम् – कृ + तुमुन्।
ईरितः – ईर् + क्त।
प्रोक्तम् – प्र + वच् + क्त।
शक्यः – शक् + यत्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) 'भवेद्येन' अत्र सन्धिः वर्ण संयोगो वा? (*ii*) विवेकी कस्य निर्णयः कर्तुम् समर्थः?

**(II) पूर्णवाक्येन उत्तरत–**

विवेकी: किम्?

**(III) भाषिककार्यम्–**

(*i*) 'विवेकः' अस्य क्रियापदम् किम्?
(क) कथितः (ख) प्रोक्तः (ग) ईरितः (घ) भवेत्
(*ii*) कर्तुम् इति पदे का धातुः?
(क) कृ (ख) क्रू (ग) क्रि (घ) कर्तु
(*iii*) 'भवेत्' इति पदं कस्मिन् लकारे अस्ति?
(क) लोट् (ख) विधिलिङ् (ग) लृट् (घ) लङ्
(*iv*) 'सः' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) धनाय (ख) बलाय (ग) जनाय (घ) विवेकाय

**उत्तराणि–** (I) (*i*) सन्धिः (*ii*) तत्त्वार्थस्य।
(II) येन केनापि यत् प्रोक्तम् तस्य तत्त्वार्थनिर्णयः जनः येन कर्तुं शक्यः भवेत्, सः एव विवेकः।
(III) (*i*) (ग) ईरितः (*ii*) (क) कृ (*iii*) (ख) विधिलिङ् (*iv*) (घ) विवेकाय।

**प्रश्ननिर्माणम्–** (*i*) **विवेकेन** यथार्थनिर्णयः भवति।
(*ii*) **जनानां** कथनस्य निर्णयः विवेकः करोति।
(*iii*) विवेकः एव **तत्त्वार्थनिर्णयं** करोति।

**उत्तराणि–**(*i*) केन (*ii*) केषाम् (*iii*) किम्।

***6. वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।***
***स केनापि प्रकारेण परैर्न परिभूयते॥6॥***

**हिंदी अनुवाद (Hindi Translation)**

जो मंत्री बोलने में चतुर, धैर्यवान् और सभा में भी निडर होता है वह शत्रुओं के द्वारा किसी भी प्रकार से अपमानित नहीं किया जा सकता है।

**अन्वयः (Prose-order)**

**वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।**
**स केनापि प्रकारेण परैर्न परिभूयते॥6॥**

(यः) मन्त्री (*i*) .................... धैर्यवान्, (*ii*) .................... अपि अकातरः (अस्ति) सः (*iii*) .................... केन अपि (*iv*) .................... न परिभूयते।

**मञ्जूषा–** | परैः, प्रकारेण, सभायाम्, वाक्पटुः |

**उत्तराणि–**(*i*) वाक्पटुः (*ii*) सभायाम् (*iii*) परैः (*iv*) प्रकारेण।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**वाक्पटुः**–वाण्याम् निपुणः, बोलने में निपुण (Expert in speaking)। **अकातरः**–भयरहितः, निडर (Fearless)। **परिभूयते**–तिरस्क्रियते, अपमानित होता है (Is insulted)।

**संस्कृते भावार्थः (Summary)**

**वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।**
**स केनापि प्रकारेण परैर्न परिभूयते॥6॥**

अर्थात्–यः (*i*) ...................... वक्तुं चतुरः, धैर्ययुक्तः सभायाम् (*ii*) ...................... च भवति सः अन्यैः (*iii*) ...................... केन अपि प्रकारेण न (*iv*) ......................।

**मञ्जूषा**– निर्भीकः, तिरस्क्रियते, जनैः, मन्त्री

**उत्तराणि**–(*i*) मन्त्री (*ii*) निर्भीकः (*iii*) जनैः (*iv*) तिरस्क्रियते।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

वाक्यपटुर्धैर्यवान् – वाक्पटुः + धैर्यवान् (विसर्ग सन्धिः)। स केनापि – सः + केनापि (विसर्ग सन्धिः)।
अप्यकातरः – अपि + अकातरः (यण् सन्धिः)। परैर्नः – परैः + न (विसर्ग सन्धिः)।
केनापि – केन + अपि (दीर्घ सन्धिः)।

**समासाः (Compounds)**

वाक्पटुः – वाचि पटुः (सप्तमी तत्पुरुषः)। अकातरः – न कातरः (नञ् तत्पुरुषः)।

**प्रत्ययाः (Suffixes)**

धैर्यवान् – धैर्य + मतुप्।
मन्त्री – मन्त्र + इन्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कः परैः न परिभूयते? (*ii*) अत्र 'सः' पदम् कस्मै प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

मन्त्री कीदृशः भवेत्?

**(III) भाषिककार्यम्–**

(*i*) 'तिरस्क्रियते' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(क) भूयते (ख) अपमान्यते (ग) अवमान्यते (घ) परिभूयते

(*ii*) 'न कातरः' इति स्थाने किं पदं प्रयुक्तम्?
(क) अनकातरः (ख) आकातरः (ग) अकातरः (घ) कातरः

(*iii*) 'परिभूयते' इति पदे का मूलधातुः?
(क) भू (ख) भूय (ग) भूयस् (घ) भूयः

(*iv*) 'वक्तुं चतुरः' इति कस्य पदस्य अर्थः?
(क) वाचिपटुः (ख) वाक्पटुः (ग) वाग्पटुः (घ) वाणीपटुः

**उत्तराणि**– (I) (*i*) अकातर-मन्त्री (*ii*) मन्त्रिणे।
(II) मन्त्री वाक्पटुः, धैर्यवान् सभायाम् अकातरः च भवेत्।
(III) (*i*) (घ) परिभूयते (*ii*) (ग) अकातरः (*iii*) (क) भू (*iv*) (ख) वाक्पटुः।

**प्रश्ननिर्माणम्–** (*i*) मन्त्री **वाक्पटुः** भवेत्। (*ii*) मन्त्री **सभायाम्** अकातरः अपि भवेत्।
(*iii*) वाक्पटुः **मन्त्री** कदापि न परिभूयते। (*iv*) **धैर्यवान्** मन्त्री केनापि प्रकारेण परिभूयते।

**उत्तराणि–**(*i*) कीदृशः (*ii*) कुत्र (*iii*) कः (*iv*) कीदृशः।

***7. य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।***
***न कुर्यादहितं कर्म स परेभ्यः कदापि च॥7॥***

**हिंदी अनुवाद (Hindi Translation)**

जो (मनुष्य) अपना कल्याण और बहुत अधिक सुख चाहता है, उसे दूसरों के लिए कभी अहितकारी कार्य नहीं करना चाहिए।

**अन्वयः (Prose-order)**

**य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च॥7॥**

यः (*i*) ..................... श्रेयः प्रभूतानि (*ii*) ..................... च इच्छति, सः (*iii*) ..................... अहितं कर्म (*iv*) ..................... न कुर्यात्।

**मञ्जूषा–** | कदापि, आत्मनः, सुखानि, परेभ्यः |

**उत्तराणि–**(*i*) आत्मनः (*ii*) सुखानि (*iii*) परेभ्यः (*iv*) कदापि।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**श्रेयः**–कल्याणम्, कल्याण (Welfare)। **अहितं**–हितरहितम्, बुरा (Harmful)।

**संस्कृते भावार्थः (Summary)**

**य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च॥7॥**

**अस्य भावोऽस्ति यत्**–यदि जनः आत्मनः कृते (*i*) ..................... बहूनि च सुखानि वाञ्छति तर्हि तेन परेभ्यः जनेभ्यः कदापि (*ii*) ..................... कर्म न कर्त्तव्यम्। यतोहि एषा साधूक्तिः अस्ति यत् यः परेभ्यः (*iii*) ..................... खनति, तस्य कृते गर्तं स्वयमेव प्रकृत्या वा जन्यते। अतः अस्माभिः कदापि परेषाम् कृते (*iv*) ..................... न कर्त्तव्यम्।

**मञ्जूषा–** | कूपम्, पीडनं, कल्याणं, अहितकरं |

**उत्तराणि–**(*i*) कल्याणं (*ii*) अहितकरं (*iii*) कूपम् (*iv*) पीडनं।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

इच्छत्यात्मनः– इच्छति + आत्मनः (यण् सन्धिः)। कदापि – कदा + अपि (दीर्घ सन्धिः)।
कुर्यादहितं – कुर्यात् + अहितं (जशत्व सन्धिः)।

**समासाः (Compounds)**

अहितं – न हितम् (नञ् तत्पुरुषः)। आत्मनः श्रेयः – आत्मश्रेयः (षष्ठी तत्पुरुषः)।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) जनः आत्मनः किम् इच्छति? (*ii*) मनुष्यः कति सुखानि इच्छति?

**(II) पूर्णवाक्येन उत्तरत–**

कः परेभ्यः अहितम् न कुर्यात्?

**(III) भाषिककार्यम्–**

(*i*) 'सुखानि' अस्य विशेषण पदम् किम्?
(क) प्रभूतानि (ख) श्रेयः (ग) अहितं (घ) कदापि

(*ii*) 'कल्याणम्' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?
(क) सुखानि (ख) श्रेयः (ग) आत्मनः (घ) कर्म

(*iii*) 'कुर्यात्' इति क्रिया पदस्य कर्तृपदम् किम्?
(क) परेभ्यः (ख) श्रेयः (ग) कर्म (घ) सः

(*iv*) 'न हितम्' इति स्थाने किं पदं प्रयुक्तम्?
(क) इच्छति (ख) अहितम् (ग) अनहितम् (घ) कर्म

**उत्तराणि–** (I) (*i*) श्रेयः (*ii*) प्रभूतानि।
(II) यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति सः परेभ्यः अहितम् न कुर्यात्।
(III) (*i*) (क) प्रभूतानि (*ii*) (ख) श्रेयः (*iii*) (घ) सः (*iv*) (ख) अहितम्।

**प्रश्ननिर्माणम्–** (*i*) मनुष्यः आत्मनः **श्रेयः** इच्छति। (*ii*) जनः **अहितं** कर्म न कुर्यात्।
(*iii*) सः **परेभ्यः** अहितं कर्म न कुर्यात्। (*iv*) जनः **प्रभूतानि** सुखानि इच्छति।

**उत्तराणि–**(*i*) किम् (*ii*) कीदृशम् (*iii*) केभ्यः (*iv*) कति।

**8. *आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।***
***तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥8॥***

**हिंदी अनुवाद (Hindi Translation)**

आचरण (मनुष्य का) पहला धर्म है, यह विद्वानों का वचन है। इसलिए सदाचार की रक्षा प्राणों से भी बढ़कर करनी चाहिए।

**अन्वयः (Prose-order)**

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**
**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥8॥**

(*i*) ..................... प्रथमः धर्मः इति एतत् (*ii*) ..................... वचः, तस्मात् (*iii*) ..................... अपि सदाचारं (*iv*) ..................... रक्षेत्।

**मञ्जूषा–** प्राणेभ्यः, आचारः, विशेषतः, विदुषां

**उत्तराणि–**(*i*) आचारः (*ii*) विदुषां (*iii*) प्राणेभ्यः (*iv*) विशेषतः।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**आचारः**–सदाचारः, अच्छा आचरण (Good conduct)। **विशेषतः**–विशेषरूप से (Specially)। **वचः**–उक्तिः, कथन (Saying)।

**संस्कृते भावार्थः (Summary)**

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**
**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥8॥**

**अस्य भावोऽस्ति यत्**–सदाचारः जनानां (*i*) ..................... धर्मः अस्ति, इति (*ii*) ..................... कथयन्ति अतएव जनैः (*iii*) ..................... रक्षा प्राणेभ्यः अपि (*iv*) ..................... करणीया।

**मञ्जूषा–** विद्वांसः, विशेषतः, प्रथमः, सदाचारस्य

**उत्तराणि–**(*i*) प्रथमः (*ii*) विद्वांसः (*iii*) सदाचारस्य (*iv*) विशेषतः।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

प्रथमो धर्मः – प्रथमः + धर्मः (विसर्ग सन्धिः)।
इत्येतद् – इति + एतद् (यण सन्धिः)।
सदाचारम् – सत् + आचरम् (व्यंजन सन्धिः)।
प्राणेभ्योऽपि – प्राणेभ्यो + अपि (पूर्वरूप सन्धिः)।

**समासाः (Compounds)**

विदुषां वचः – विद्वद्वचः (षष्ठी तत्पुरुषः)।
सदाचारम् – शोभनम् आचारम् (कर्मधारयः)।

**प्रत्ययः (Suffix)**

विशेषतः – विशेष + तसिल्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कः प्रथमः धर्मः? (*ii*) श्लोके किम् अव्ययपदं प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

प्राणेभ्यः अपि विशेषतः कः रक्षणीयः?

**(III) भाषिककार्यम्–**

(*i*) 'रक्षेत्' पदे कः लकारः?
(क) लोट् (ख) विधिलिङ् (ग) लङ् (घ) लट्

(*ii*) 'प्रथम धर्मः' इति अनयोः पदयोः विशेष्यपदं किम्?
(क) धर्मः (ख) प्रथमः (ग) प्रथम (घ) धर्म

(*iii*) अत्र कस्मिन् पदे पञ्चमी विभक्त्यर्थे 'तसिल्' प्रत्ययस्य प्रयोगः अभवत्?
(क) तस्माद् (ख) वचः (ग) सदाचारं (घ) विशेषतः

(*iv*) 'एतत्' इति सर्वनामपदस्य प्रयोगः कस्मै पदाय अभवत्?
(क) धर्माय (ख) सदाचाराय (ग) वचसे (घ) प्राणेभ्यः

**उत्तराणि–** (I) (*i*) आचारः (*ii*) अपि।
(II) प्राणेभ्यः अपि विशेषतः सदाचारः रक्षणीयः।
(III) (*i*) (ख) विधिलिङ् (*ii*) (क) धर्मः (*iii*) (घ) विशेषतः (*iv*) (ग) वचसे।

**प्रश्ननिर्माणम्–** (*i*) **आचारः** प्रथमः धर्मः अस्ति। (*ii*) इदं **विद्वांसः** कथयन्ति।
(*iii*) सदाचारः अवश्यमेव **जनैः** पालनीयः वर्तते। (*iv*) सः **प्राणेभ्यः** अपि विशेषो भवति।

**उत्तराणि–**(*i*) कः (*ii*) के (*iii*) कैः (*iv*) केभ्यः।

## पाठ्यपुस्तकस्य अभ्यासः
## (अनुप्रयोगः)

**1. प्रश्नानाम् उत्तरम् एकपदेन दीयताम् (मौखिक-अभ्यासार्थम्)**

(क) पिता पुत्राय बाल्ये किं यच्छति?
(ख) मूढमतिः कीदृशीं वाचं परित्यजति?
(ग) अस्मिन् लोके के एव चक्षुष्मन्तः प्रकीर्तिताः?
(घ) नरः केन गुणेन कस्यापि कथनस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?
(ङ) प्राणेभ्योऽपि किं रक्षणीयम्?
(च) आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्?
(छ) वाचि किं भवेत्?
(ज) 'वाचि पटुः' इति स्थाने किं पदं प्रयुक्तम्?

**उत्तराणि–** (क) विद्याधनम् (ख) धर्मप्रदाम् (ग) विद्वांसः (घ) विवेकेन
(ङ) सदाचारः (च) अहितम् (छ) अवक्रता (ज) वाक्पटुः।

**2. पाठात् चित्वा अधोलिखितपद्यांशानां भावम् उपयुक्तपदैः पूरयत–**

(क) चित्ते वाचि च सरलता महात्मभिः ........................ मन्यते।
(ख) पिता पुत्राय विद्यादानार्थं महत् कष्टं सहते। पुत्रेण अस्य अनुभूतिः एव ........................ कथ्यते।
(ग) ........................ एव धर्मप्रदां वाचं त्यक्त्वा ........................ वाचं वदति।
(घ) अस्मिन् संसारे केवलं ........................ एव ........................ मन्तव्याः।
(ङ) प्रत्येकं कथनस्य ........................ येन क्रियते सः ........................ अस्ति।
(च) यः मन्त्री (परामर्शदाता) तु ............, ............, ............ भवति स अन्यैः कदापि न तिरस्क्रियते।
(छ) यः आत्मनः कल्याणम् इच्छति सः परेभ्यः ........................ कर्म कदापि न कुर्यात्।
(ज) ........................ एव प्रथमो धर्मः अतः विशेषतः ........................ रक्षेत्।

**उत्तराणि–** (क) समत्वं (ख) कृतज्ञता (ग) विमूढधीः, परुषां
(घ) विद्वांसः, चक्षुष्मन्तः (ङ) अर्थनिर्णयः, विवेकः (च) वाक्पटुः, धैर्यवान्, सभायामप्यकातरः
(छ) अहितं (ज) आचारः, सदाचारं।

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

**यथा** **विमूढधीः** पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।
कः पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते?

(*i*) संसारे विद्वांसः **ज्ञानचक्षुर्भिः** नेत्रवन्तः कथ्यन्ते। (*ii*) जनकेन सुताय **शैशवे** विद्याधनं दीयते।
(*iii*) तत्त्वार्थस्य निर्णयः **विवेकेन** कर्तुं शक्यः। (*iv*) **साधूनां** चित्ते वाचि च सरलता भवति।
(*v*) **धैर्यवान्** लोके परिभवं न प्राप्नोति।
(*vi*) **आत्मकल्याणम्** इच्छन् नरः परेषाम् अनिष्टं न कुर्यात्।

**उत्तराणि–** (*i*) कै (*ii*) कदा (*iii*) केन
(*iv*) केषाम् (*v*) क (*vi*) किम्।

**4. पाठात् चित्वा अधोलिखितानां श्लोकानाम् अन्वयम् उचितपदक्रमेण पूरयत–**

(*i*) पिता पुत्राय बाल्ये महत् ............ यच्छति, अस्य पिता किं ............ तेपे इत्युक्तिः ............।
(*ii*) येन केनापि यत् ............ तस्य तत्त्वार्थनिर्णयः येन ............ शक्यः ............ सः इति ............ ईरितः।
(*iii*) यः आत्मनः श्रेयः ............ सुखानि च इच्छति, सः परेभ्यः अहितं ............ कदापि च न ............।

**उत्तराणि–** (*i*) विद्याधनम्, तपः, तत्कृतज्ञता। (*ii*) प्रोक्तम्, कर्तुं, भवेत्, विवेकः। (*iii*) प्रभूतानि, कर्म, कुर्यात्।

**5. अधोलिखितम् उदाहरणद्वयं पठित्वा अन्येषां प्रश्नानाम् उत्तराणि लिखत–**

| प्रश्नाः | उत्तराणि |
|---|---|
| **(क) श्लोक संख्या-1** | |
| **यथा–** विद्याधनं कः यच्छति:? | पिता |
| (*i*) पिता विद्याधनं कस्मै यच्छति? | ........................ |
| (*ii*) पिता पुत्राय विद्याधनं कदा यच्छति? | ........................ |
| (*iii*) पुत्रः किम् अनुभवति? | ........................ |
| **(ख) श्लोक संख्या-3** | |
| **यथा–** सत्या मधुरा च वाणी का? | धर्मप्रदा |
| (*i*) धर्मप्रदां वाचं कः त्यजति? | ........................ |
| (*ii*) मूढः पुरुषः कां वाणीं वदति? | ........................ |
| (*iii*) मन्दमतिः कीदृशं फलं खादति? | ........................ |

(ग) श्लोक संख्या-4

**यथा–** नरस्य वास्तविकं चक्षुः किम्? ज्ञानम्

(i) येषां चक्षूंषि भवन्ति ते के? ..............................

(ii) चक्षुष्मन्तः के कथिताः? ..............................

(iii) वस्तुतः लोके विद्वांसः के? ..............................

(घ) श्लोक संख्या-7

**यथा–** बुद्धिमान् नरः किम् इच्छति? आत्मनः श्रेयः

(i) कियन्ति सुखानि इच्छति? ..............................

(ii) सः कदापि किं न कुर्यात्? ..............................

(iii) सः केभ्यः अहितं न कुर्यात्? ..............................

**उत्तराणि–** (क) (i) पुत्राय (ii) बाल्ये (iii) कृतज्ञताम्।

(ख) (i) विमूढधी: (ii) परुषाम् (iii) अपक्वम्।

(ग) (i) चक्षुष्मन्तः (ii) विद्वांसः (iii) चक्षुष्मन्तः।

(घ) (i) प्रभूतानि (ii) अहितं कर्म (iii) परेभ्यः।

**6. (क) पाठात् विचित्य समुचितैः विशेषणपदैः रिक्तस्थानानि पूरयत–**

(क) .............. .............. .............. मन्त्री परैः न परिभूयते।

(ख) बुद्धिमान् सदा .............................. एव वाचं वदति।

(ग) यः सुखानि इच्छति सः .............................. कर्म त्यजेत्।

(घ) पुत्रः शैशवे पितुः .............................. विद्याधनं प्राप्नोति।

(ङ) '.............. .............. आचारः' इति विद्वांसः मन्यन्ते।

**उत्तराणि–** (क) वाक्पटुः, धैर्यवान्, सभायामप्यकातरः (ख) धर्मप्रदाम् (ग) अहितम्

(घ) महत् (ङ) प्रथमो धर्मः।

**7. मञ्जूषायाः तद्भावात्मकसूक्तीः विचित्य अधोलिखितकथनानां समक्षं लिखत–**

(क) विद्याधनं महत्।

..............................................................................................................

..............................................................................................................

(ख) आचारः प्रथमो धर्मः।

..............................................................................................................

..............................................................................................................

(ग) चित्ते वाचि च अवक्रता एव समत्वम्।

..............................................................................................................

..............................................................................................................

**मञ्जूषायां सूक्तयः**

आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्।
मनसि एकं वचसि एकं कर्मणि एकं महात्मनाम्।
विद्याधनं सर्वधनं प्रधानम्।
सं वो मनांसि जानताम्।
विद्याधनं श्रेष्ठं तन्मूलमितरद्धनम्।
आचारप्रभवो धर्मः सन्तश्चाचारलक्षणाः।

**उत्तराणि**– (क) (*i*) विद्याधनम् सर्वधनं प्रधानम्, (*ii*) विद्याधनं श्रेष्ठं तन्मूलमितरद्धनम्।
(ख) (*i*) आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्, (*ii*) आचारप्रभवो धर्मः सन्तश्चाचारलक्षणाः।
(ग) (*i*) मनसि एकं वचसि एकं कर्मणि एकं महात्मनाम्, (*ii*) सं वो मनांसि जानताम्।

**8. अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्दं कोष्ठकात् चित्वा लिखत–**

| शब्दः | विलोमशब्दः | |
|---|---|---|
| कृतज्ञता | ........................ | (कृपणता, कृतघ्नता, कातरता) |
| पक्वः | ........................ | (परिपक्वः, अपक्वः, क्वथितः) |
| परुषा | ........................ | (पौरुषी, कोमला, कठोरा) |
| विमूढधीः | ........................ | (सुधीः निधिः, मन्दधीः) |
| आलस्यम् | ........................ | (उद्विग्नता, विलासिता, उद्योगः) |
| कातरः | ........................ | (अकरुणः, अधीरः, अकातरः) |

**उत्तराणि**– कृतघ्नता, अपक्वः, कोमला, सुधीः, उद्योगः, अकातरः।

**9. अधोलिखितानां शब्दानां त्रयः समानार्थकाः शब्दाः शब्दमञ्जूषायाः चित्वा लिख्यन्ताम्–**

| | | | |
|---|---|---|---|
| **चित्तम्** | ........................ | ........................ | ........................ |
| **मुखम्** | ........................ | ........................ | ........................ |
| **प्रभूतम्** | ........................ | ........................ | ........................ |
| **चक्षुष्** | ........................ | ........................ | ........................ |
| **सभा** | ........................ | ........................ | ........................ |
| **श्रेयः** | ........................ | ........................ | ........................ |

**शब्द–मञ्जूषा**

| | | |
|---|---|---|
| वदनम् | नयनम् | चेतः |
| मनः | कल्याणम् | बहु |
| संसद् | भूरि | नेत्रम् |
| लोचनम् | वक्त्रम् | समितिः |
| शुभम् | मानसम् | शिवम् |
| आननम् | विपुलम् | परिषद् |

**उत्तराणि**–

| | | | |
|---|---|---|---|
| **चित्तम्** | – मनः | मानसम् | चेतः |
| **मुखम्** | – वदनम् | आननम् | वक्त्रम् |
| **प्रभूतम्** | – भूरि | विपुलम् | बहु |
| **चक्षुष्** | – नयनम् | लोचनम् | नेत्रम् |
| **सभा** | – संसद् | समितिः | परिषद् |
| **श्रेयः** | – शुभम् | कल्याणम् | शिवम् |

**10. अधस्ताद् समासविग्रहाः दीयन्ते तेषां समस्तपदानि पाठाधारेण दीयन्ताम्–**

| विग्रहः | समस्तपदम् | समासनाम |
|---|---|---|
| तत्त्वार्थस्य निर्णयः | ........................ | षष्ठी तत्पुरुषः |
| वाचि पटुः | ........................ | सप्तमी तत्पुरुषः |
| धर्मं प्रददाति इति (ताम्) | ........................ | उपपदतत्पुरुषः |
| न कातरः | ........................ | नञ् तत्पुरुषः |

| | | |
|---|---|---|
| न हितम् | ............................ | नञ् तत्पुरुषः |
| महान् आत्मा येषाम् ते | ............................ | बहुव्रीहिः |
| विमूढा धीः यस्य सः | ............................ | बहुव्रीहिः |

**उत्तराणि–** तत्त्वार्थनिर्णयः, वाक्पटुः, धर्मप्रदाम्, अकातरः, अहितम्, महात्मानः, विमूढधीः।

**11. अधोलिखितेषु भिन्नप्रकृतिकं शब्दं रेखाङ्कितं कुरुत–**

| | |
|---|---|
| (क) तपः, धर्मः, श्रेयः, वचः। | (लिङ्गकारणात्) |
| (ख) तथ्यतः, विशेषतः, मुख्यतः, ईरितः। | (प्रत्ययकारणात्) |
| (ग) लघुता, प्रकीर्तिता, अवक्रता, कृतज्ञता। | (प्रत्ययकारणात्) |
| (घ) लोके, चित्ते, वाचि, भुङ्क्ते। | (विभक्तिकारणात्) |

**उत्तराणि–** (क) धर्मः। (ख) ईरितः। (ग) प्रकीर्तिता। (घ) भुङ्क्ते।

**12. अधोलिखित शब्दैः सह 'मतुप्!' प्रत्ययं योजयत–**

**यथा–** चक्षुष् + मतुप् = चक्षुष्मान्

धैर्य + मतुप् = धैर्यवान्

विद्या + मतुप् = ............................

धन + मतुप् = ............................

गुण + मतुप् = ............................

श्री + मतुप् = ............................

बुद्धि + मतुप् = ............................

नीति + मतुप् = ............................

शक्ति + मतुप् = ............................

**उत्तराणि–** विद्यावान्, धनवान्, गुणवान्, श्रीमान्, बुद्धिमान्, नीतिमान्, शक्तिमान्।

## योग्यता-विस्तारः
## (न परीक्षाकृते)

**(क) 'तिरुक्कुरल-सूक्तिसौरभम्' इति पाठस्य तमिल मूलपाठः (देवनागरी-लिपौ)**

सोर्कोट्टम् इल्लदु सेप्पुम् ओरू तलैया उळ्कोट्टम् इन्मै पेरिन्।
मगन् तन्दैक्काट्रुम उद्रवि इवन् तन्दै एन्नोट्रान् कौमू एननुम् सोक्त।
इनिय उळवाग इन्नाद कूरल् कनि इरूप्पक् काय् कवरंदट्र।
कण्णुडैयर् एन्पवर् कट्रोर मुहत्तिरण्डु पुण्णुडैयर कल्लादवर्।
एप्पोरूल यार यार वाय् केट्पिनुम् अप्पोरूल मेय् पोरूल काण्पदरिवु।
सोललवल्लन् सोरविलन् अन्जान् अवनै इहलवेल्लल् यारुक्कुम् अरितु।
नोय एल्लाम् नोय् सेयदार मेलवाम् नोय् सेययार नोय् इन्मै वेण्डुभवर्।
ओषुक्कम् विषुप्पम् तरलान् ओषुक्कम् उयिरिनुम् ओम्भप्पडुम्।

**(ख) ग्रन्थपरिचयः–**

तिरुक्कुरल् तमिलभाषायां रचिता तमिलसाहित्यस्य उत्कृष्टा कृतिः अस्ति। अस्य प्रणेता तिरुवल्लुवरः अस्ति। ग्रन्थस्य रचनाकालः अस्ति–ईशवीयाब्दस्य प्रथमशताब्दी।

अस्मिन् ग्रन्थे सकलमानवजातेः कृते जीवनोपयोगिसत्यम् प्रतिपादितम्।

**तिरु** शब्दः 'श्री' वाचकः। 'तिरुक्कुरल्' पदस्य अभिप्रायः अस्ति श्रिया युक्तं कुरल छन्दः अथवा श्रिया युक्ता वाणी।

अस्मिन् ग्रन्थे धर्म-अर्थ-काम-संज्ञकाः त्रयः भागाः सन्ति। त्रयाणां भागानां पद्यसंख्या 1330 अस्ति।

**हिंदी अनुवाद (Hindi Translation)**–तिरुक्कुरल् तमिलभाषा में रचित तमिल साहित्य की श्रेष्ठ रचना है। इसके रचयिता महाकवि तिरुवल्लुवर हैं। इस ग्रंथ का रचनाकाल प्रथम शताब्दी ईसवी है।

इस ग्रंथ में संपूर्ण मानव जाति के लिए उपयोगी ज्ञान प्रतिपादित किया गया है।

तिरु शब्द का अर्थ है, 'श्री'। तिरुक्कुरल् शब्द का अर्थ है 'श्री' से युक्त कुरल् छन्द अथवा श्रीयुक्त वाणी। इस ग्रंथ में धर्म-अर्थ-काम नामक तीन भाग हैं–तीनों भागों की श्लोक संख्या 1330 है।

**(ग) भावविस्तार:–**

**सदाचार:**

किं कुलेन विशालेन शीलमेवात्र कारणम्।
कृमय: किं न जायन्ते कुसुमेषु सुगन्धिषु।।
आगमानां हि सर्वेषामाचार: श्रेष्ठ उच्यते।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते।।

**हिंदी अनुवाद (Hindi Translation)**–उच्च कुल में जन्म लेने से व्यक्ति सम्मान प्राप्त नहीं करता। अच्छे चरित्र से ही सम्मान प्राप्त किया जाता है। सुगंधयुक्त फूलों में भी कीड़े उत्पन्न हो जाते हैं!

सभी शास्त्रों में आचरण को ही श्रेष्ठ कहा गया है। सदाचार से धर्म का पालन होता है तथा धर्म के पालन से आयु बढ़ती है।

**विद्याधनम्**

विद्याधनम् धनं श्रेष्ठं तनमूलमितरद्धनम्।
दानेन वर्धते नित्यं न भाराय न नीयते।।
माता शत्रु: पिता वैरी येन बालो न पाठित:।
न शोभते सभामध्ये हंसमध्ये बको यथा।।

**हिंदी अनुवाद (Hindi Translation)**–विद्यारूपी धन अन्य धनों से श्रेष्ठ धन है। यह दान देने से सदैव बढ़ता है, न यह भारी होता है, न चोरों द्वारा चुराया जा सकता है।

जो माता-पिता अपने बच्चे को विद्या नहीं पढ़ाते, वे उसके शत्रु होते हैं क्योंकि अशिक्षित व्यक्ति सभा में उसी तरह सुशोभित नहीं होता जिस तरह हंसों के मध्य में बगुला।

**मधुरा वाक्**

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तव:।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।
वाणी रसवती यस्य यस्य श्रमवती क्रिया।
लक्ष्मी: दानवती यस्य सफलं तस्य जीवितम्।।

**हिंदी अनुवाद (Hindi Translation)**–मधुर वचन बोलने से सभी प्राणी प्रसन्न हो जाते हैं, इसलिए ऐसे वचन ही बोलना चाहिए, वचनों में क्या दरिद्रता। जिस व्यक्ति की वाणी मधुर हो, कार्य परिश्रम से पूर्ण हो, जिसका धन दान देने में काम आता हो, उसी व्यक्ति का जीवन सफल है।

**विद्वांस:**

नास्ति यस्य स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पण: किं करिष्यति।।
विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।

**हिंदी अनुवाद (Hindi Translation)**–जिस व्यक्ति में अपनी बुद्धि नहीं है, शास्त्र उसका क्या उपकार करेंगे, जिस प्रकार आँखों से रहित व्यक्ति का दर्पण क्या उपकार करेगा।

विद्वान की तुलना राजा से नहीं की जा सकती। राजा तो अपने ही देश में पूजा जाता है, विद्वान सब जगह पूजा जाता है।

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

**1. (अ) अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–** **5**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी:।।**

**I. एकपदेन उत्तरत–** **½ × 2 = 1**

(*i*) परुषां वाचं क: वदति? (*ii*) बुद्धिमन्त: जना: कां वाणीं वदन्ति?

**II. पूर्णवाक्येन उत्तरत–** **2 × 1 = 2**

मन्दमति: कीदृशं फलं त्यक्त्वा अपक्वं फलं खादति?

**III. भाषिककार्यम्–** **½ × 4 = 2**

(*i*) 'परित्यज्य' इति अस्य समानार्थकं श्लोकात् चित्वा लिखत।
(क) त्यजित्वा (ख) त्यकतवा (ग) त्यक्त्वा (घ) त्यजत्वा

(*ii*) 'खादति' अस्मिन् अर्थे किं क्रियापदम् अत्र प्रयुक्तम्?
(क) भुङ्क्ते (ख) भोजते (ग) भुज्यते (घ) भोज्यते

(*iii*) 'परुषाम्' इत्यस्य शब्दस्य भावानुकूलं शुद्धम् अर्थ चित्वा लिखत–
(क) पौरुषयुक्तम् (ख) कठोराम् (ग) परेभ्य: शान्तिकारकम्(घ) पूर्णाम्

(*iv*) 'भुङ्क्ते' इति क्रियाया: कर्तृपदं किम्?
(क) पक्वं (ख) फलं (ग) विमूढधी: (घ) अपक्वं

**उत्तराणि–** I. (*i*) विमूढधी: (*ii*) धर्मप्रदाम्

II. मन्दमति: पक्वं फलं त्यक्त्वा अपक्वं फलं खादति।

III. (*i*) (ग) त्यक्त्वा (*ii*) (क) भुङ्क्ते (*iii*) (ख) कठोराम् (*iv*) (ग) विमूढधी:

(आ) अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत– 5

**यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म सः परेभ्यः कदापि च॥**

**I. एकपदेन उत्तरत–** ½ × 4 = 2

(i) नरः आत्मनः किमिच्छति?
(ii) 'बहूनि' इति पदस्य अर्थे किं पदमत्र प्रयुक्तम्?
(iii) नरः कीदृशं कर्म न कुर्यात्?
(iv) नरः केभ्यः अशुभं कर्म न कुर्यात्?

**II. पूर्णवाक्येन उत्तरत–** 1 × 1 = 1

जीवने नरः किं किं इच्छति?

**III. निर्देशानुसारम् उत्तरत–** ½ × 4 = 2

(i) 'प्रभूतसुखानि' इति स्थाने किं पदद्वयं प्रयुक्तम्?
(क) प्रभूतानि सुखानि (ख) प्रभूतं सुखानि (ग) श्रेयः प्रभूतानि (घ) प्रभूतं सुखम्
(ii) 'न कुर्यादहितं कर्म' इत्यत्र 'कर्म' पदस्य विशेषणं पदं किमस्ति?
(क) न (ख) कुर्याद् (ग) कुर्यात् (घ) अहितं
(iii) 'कल्याणं' इति पदस्य समानार्थकं पद्यांशात् चित्वा लिखत।
(क) सुखानि (ख) श्रेयः (ग) अहितं (घ) कर्म
(iv) 'कुर्यात्' इति क्रियापदस्य कर्तृ पदं किम्?
(क) सः (ख) यः (ग) कर्म (घ) श्रेयः

**उत्तराणि–** I. (i) श्रेयः (ii) प्रभूतानि (iii) अहितम् (iv) परेभ्यः
II. जीवने नरः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति।
III. (i) (क) प्रभूतानि सुखानि (ii) (घ) अहितं (iii) (ख) श्रेयः (iv) (क) सः

(इ) अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत– 5

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृज्ञता॥**

**I. एकपदेन उत्तरत–** ½ × 2 = 1

(i) पिता विद्याधनम् कस्मै यच्छति?
(ii) विद्यादानाय पिता किम् करोति?

**II. पूर्णवाक्येन उत्तरत–** 2 × 1 = 2

पितुः तपस्यां ज्ञात्वा पुत्रः किम् अनुभवति?

**III. भाषिककार्यम्–** ½ × 4 = 2

(i) 'अस्य' इति सर्वनामपदम् कस्मै प्रयुक्तम्?
(क) पित्रे (ख) पुत्राय (ग) शिष्याय प्रभूतानि (घ) धनाय
(ii) 'जनकः' इत्यस्य पदस्य कः पर्यायः श्लोके आगतः?
(क) पुत्राय (ख) तपः (ग) पिता (घ) तेपे
(iii) 'विद्याधनम्' इति विशेष्य पदस्य किं विशेषणपदम् अत्र प्रयुक्तम्?
(क) महत् (ख) पुत्राय (ग) विद्या (घ) धनम्
(iv) 'कथनम्' इत्यर्थे कः शब्दः अस्मिन् श्लोके प्रयुक्तः?
(क) इत्युक्तिः (ख) इति (ग) तत् (घ) उक्तिः

**उत्तराणि–** I. (i) पुत्राय (ii) तपः
II. पितुः तपस्यां ज्ञात्वा पुत्रः कृतज्ञताम् अनुभवति।
III. (i) (ख) पुत्राय (ii) (ग) पिता (iii) **(क)** महत् (iv) (घ) उक्तिः

**2. निम्नलिखित-श्लोकस्य भावार्थम् मञ्जूषायाः उपयुक्तशब्दैः पूरयत–** 4

**I. विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुनामनी मते॥** ½ × 4 = 2

**भावार्थः**–विद्या एव नरस्य (i) ...................... वर्तते। जनाः अनया एव संसारे सर्वविधं व्यवहारं कर्तुं समर्थाः भवन्ति अतः अस्मिन् (ii) ...................... केवलं विद्वांसः ज्ञानिनः विचारशीलाः एव (iii) ...................... कथिताः अन्येषां विद्यारहितानाम् (iv) ...................... तु ये चक्षुषी भवतः ते तु नाम मात्रम् एव स्तः।

**मञ्जूषा–** नेत्रवन्तः, आनने, नेत्रम्, संसारे

**उत्तराणि**–(i) नेत्रम् (ii) संसारे (iii) नेत्रवन्तः (iv) आनने।

**II. पिताऽस्य किं तपस्तेपे इत्युक्तिः तत्कृतज्ञता।** ½ × 4 = 2

**अस्य भावोऽस्ति**–बाल्यावस्थायाम् स्वपुत्राय (i) ...................... दातुं पिता अति कष्टं सहते। सर्वविधं तपः कृत्वा अपि सः स्वसन्ततिं शिक्षयितुं यतते यदि पुत्रः एतन्मात्रम् एव स्मरेत् यत् पिता तस्मै पुत्राय (ii) ...................... अकरोत् इयम् (iii) ...................... एव तस्य पुत्रस्य (iv) ...................... अस्ति।

**मञ्जूषा–** कृतज्ञता, विद्याधनं, उक्तिः, तपः

**उत्तराणि**–(i) विद्याधनं (ii) तपः (iii) उक्तिः (iv) कृतज्ञता।

3. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितक्रमेण पूरयत– $1 \times 4 = 4$

**वाक्पटु धैर्यवान् मन्त्री सभायामप्यकातरः।**
**स केनापि प्रकारेण परैर्न परिभूयते॥**

**अन्वयः**–(यः) मन्त्री (*i*) ............................ धैर्यवान् सभायाम् (*ii*) ............................ अकातरः (अस्ति) सः (*iii*) ............................ केन अपि प्रकारेण न (*iv*) ............................।

**मञ्जूषा**– अपि, परिभूयते, वाक्पटुः, परैः

**उत्तराणि**–(*i*) वाक्पटुः (*ii*) अपि (*iii*) परैः (*iv*) परिभूयते

4. निम्नलिखितकथनस्य भावं मञ्जूषायाः उपयुक्तपदैः पूरयत– $1 \times 4 = 4$

**यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च॥**

यदि जनः आत्मनः (*i*) ............................ बहूनि च (*ii*) ............................ वाञ्छति तर्हि (*iii*) ............................ परेभ्यः (*iv*) ............................ कर्म न कर्त्तव्यम्।

**मञ्जूषा**– सुखानि, श्रेयः, अहितम्, तेन

**उत्तराणि**–(*i*) श्रेयः (*ii*) सुखानि (*iii*) तेन (*iv*) अहितम्

5. उदाहरणानुसारं रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत– $1 \times 4 = 4$

(*i*) पिता <u>पुत्राय</u> बाल्ये विद्याधनं यच्छति।
(क) कः (ख) काय (ग) कस्मै (घ) कस्यै

(*ii*) तत्त्वार्थस्य निर्णयः <u>विवेकेन</u> कर्तुं शक्यः।
(क) केन (ख) कया (ग) कस्मै (घ) कस्यै

(*iii*) पिता पुत्राय बाल्ये <u>विद्याधनम्</u> यच्छति।
(क) कम् (ख) काम् (ग) कान् (घ) किम्

(*iv*) <u>पिता</u> पुत्राय तपः तपति।
(क) का (ख) कः (ग) के (घ) काः

**उत्तराणि**– (*i*) (ग) कस्मै? (*ii*) (क) केन? (*iii*) (घ) किम्? (*iv*) (ख) कः?

6. अधोलिखितासु पङ्क्तिषु सथूलाक्षरपदानां प्रसानुसारं शुद्धम् अर्थं चित्वा लिखत– $2 \times 1 = 2$

तदेवाहुः महात्मानः समत्वमिति **तथ्यतः**।

(1) तथागतः बुद्धः (2) यथार्थरूपेण (3) तथा-अस्तु (4) तथैव

**उत्तराणि**–(2) यथार्थरूपेण।

7. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत– 5

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**
**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥**

**प्रश्नाः (Questions)**

**I. एकपदेन उत्तरत–** $\frac{1}{2} \times 4 = 2$

(*i*) अस्माकं प्रथमः धर्मः कः?
(*ii*) 'आचारः प्रथमः धर्मः' इति केषां वचः?
(*iii*) कं जीवने रक्षेत्?
(*iv*) सदाचारं केभ्यः रक्षेत्?

**II. पूर्णवाक्येन उत्तरत–** $1 \times 1 = 1$

विदुषां वचः किम्?

**III. भाषिककार्यम्–** $\frac{1}{2} \times 4 = 2$

(*i*) 'दुराचारः' अस्य विलोमपदं पद्यात् चित्वा लिखत।
(क) आचारः (ख) सदाचारः (ग) समाचारः (घ) अनाचारः

(*ii*) "प्रथमः धर्मः" अत्र विशेष्यपदं किम्?
(क) प्रथमः (ख) प्रथम (ग) धर्म (घ) धर्मः

(*iii*) "विद्यावताम्" अस्य पर्यायपदं श्लोके किं प्रयुक्तम्?
(क) विदुषाम् (ख) विद्याम् (ग) विद्यावतानाम् (घ) विद्वानानाम्

(*iv*) "तस्माद् सदाचारं रक्षेत्" अत्र क्रियापदं किम्?
(क) तस्माद् (ख) तस्मात् (ग) रक्षेत् (घ) सदाचारं

**उत्तराणि**– I. (*i*) आचारः (*ii*) विदुषाम् (*iii*) सदाचारम् (*iv*) प्राणेभ्यः
II. 'आचारः प्रथमो धर्मः'। इति विदुषां वचः।
III. (*i*) (ख) सदाचारः (*ii*) (घ) धर्मः (*iii*) (क) विदुषाम् (*iv*) (ग) रक्षेत्

8. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत– 5

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥**

**प्रश्ना: (Questions)**

**I. एकपदेन उत्तरत–** ½ × 4 = 2

(*i*) लोकेऽस्मिन् के चक्षुष्मन्तः प्रकीर्तिताः?

(*ii*) अन्येषां वदने के नामनी मते?

(*iii*) विद्वांसः कुत्र चक्षुष्मन्तः प्रकीर्तिताः?

(*iv*) अन्येषां कस्मिन् स्थाने चक्षुर्नामनी मते?

**II. पूर्णवाक्येन उत्तरत–** 1 × 1 = 1

अस्मिन् लोके विद्वांसः कीदृशाः स्मृताः?

**III. भाषिककार्यम्–** ½ × 4 = 2

(*i*) 'लोकेऽस्मिन्' अत्र विशेष्यपदं किम्?

(क) अस्मिन् (ख) स्मिन्

(ग) लोकः (घ) लोके

(*ii*) 'मुखे' अस्य पर्यायपदं श्लोकात् चित्वा उत्तरपुस्तिकायां लिखत।

(क) वदने (ख) आनने (ग) वक्त्रे (घ) वचने

(*iii*) 'मूर्खाः' अस्य विलामपदं पद्यात् विचित्य उत्तरपुस्तिकायां लिखत।

(क) सज्जनाः (ख) विद्वांसः (ग) विदुषाः (घ) विद्वानाः

(*iv*) 'ते चक्षुष्मन्तः प्रकीर्तिताः' अत्र क्रियापदं किम्?

(क) प्रकीर्तिताः (ख) कीर्तिताः (ग) कथिताः (घ) चक्षुष्मन्तः

**उत्तराणि–** I. (*i*) विद्वांसः (*ii*) चक्षुषी (*iii*) लोके (*iv*) वदने

II. अस्मिन् लोके विद्वांसः चक्षुष्मन्तः स्मृताः।

III. (*i*) (घ) लोके (*ii*) (क) वदने (*iii*) (ख) विद्वांसः (*iv*) (क) प्रकीर्तिताः

**9. अधोलिखितं पद्यांशयोः भावार्थम् मञ्जूषायाः उपयुक्तपदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत–** 1 × 4 = 4

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥**

**भावार्थः**–यः मूर्खः मनुष्यः (*i*) .............................. वाणीं त्यक्त्वा कठोरां (*ii*) .............................. उच्चारयति, सः नूनं (*iii*) .............................. फलं विहाय (*iv*) .............................. फलं खादति।

**मञ्जूषा–** | वाणीम्, पक्वम्, अपक्वम्, धर्मप्रदां |

**उत्तराणि–**(*i*) धर्मप्रदां (*ii*) वाणीम् (*iii*) पक्वम् (*iv*) अपक्वम्।

**10. निम्नलिखितं पदानां दत्तेषु पर्यायपदेषु पर्यायः चित्वा लिखत–** ½ × 10 = 5

| पदानि | पर्यायाः |
|---|---|
| (1) पिता | (क) नेत्रवन्तः |
| (2) विमूढधीः | (ख) कल्याणम् |
| (3) आचारः | (ग) यथार्थरूपेण |
| (4) परिभूयते | (घ) कथिताः |
| (5) श्रेयः | (ङ) जनकः |
| (6) चक्षुष्मन्तः | (च) व्यवहारः |
| (7) अकातरः | (छ) कथयन्ति |
| (8) आहुः | (ज) मूर्खमतिः |
| (9) प्रकीर्तिताः | (झ) निर्भयः |
| (10) तथ्यतः | (ञ) अवमन्यते |

**उत्तराणि–** (1) (ङ) जनकः (2) (ज) मूर्खमतिः (3) (च) व्यवहारः (4) (ञ) अवमन्यते
(5) (ख) कल्याणम् (6) (क) नेत्रवन्तः (7) (झ) निर्भयः (8) (छ) कथयन्ति
(9) (घ) कथिताः (10) (ग) यथार्थरूपेण।

## मूल्यपरक प्रश्नाः (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्नाः** (*i*) 'पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।' इति श्लोकांशे कस्य दानस्य वर्णनम् अस्ति?

(*ii*) 'अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।' अत्र कस्य अवक्रतायाः वर्णनं वर्तते?

(*iii*) 'परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।' अत्र श्लोकांशे मूर्खमतिः कीदृशं फलं भुङ्क्ते इति लिखितम्।

(*iv*) 'आचारः प्रथमो धर्मः इति एतद् विदुषां वचः।' विद्वांसः कं प्रथमो धर्मः मन्यन्ते?

(*v*) 'विद्वांसः एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।' अत्र के चक्षुष्मन्तः (नेत्रवन्तः) कथिताः?

**उत्तराणि–** (*i*) विद्याधनस्य (*ii*) वाचः (*iii*) अपक्वम् (*iv*) आचारम् (*v*) विद्वांसः